श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६८

*रासक्रीडायां आनन्दपारवश्यवर्णनं*
*प्रणयकोपवर्णनं भवत्कृतसान्त्वनावर्णनं च*

तव विलोकनाद्गोपिकाजनाः
प्रमदसङ्कुलाः पङ्कजेक्षण।
अमृतधारया सम्प्लुता इव
स्तिमिततां दधुस्त्वत्पुरोगताः॥ १॥

तदनु काचन त्वत्कराम्बुजं
सपदि गृह्णती निर्विशङ्कितम्।
घनपयोधरे सन्निधाय सा
पुलकसंवृता तस्थुषी चिरम्॥ २॥

तव विभोऽपरा कोमलं भुजं
निजगलान्तरे पर्यवेष्टयत्।
गलसमुद्गतं प्राणमारुतं
प्रतिनिरुन्धतीवातिहर्षुला॥ ३॥

अपगतत्रपा कापि कामिनी
तव मुखाम्बुजात् पूगचर्वितम्।
प्रतिगृहय्य तद्वक्त्रपङ्कजे
निदधती गता पूर्णकामताम्॥ ४॥

विकरुणो वने संविहाय मा-
मपगतोऽसि का त्वामिह स्पृशेत्।

www.prapatti.com

इति सरोषया तावदेकया
    सजललोचनं वीक्षितो भवान्॥ ५॥

इति मुदाऽऽकुलैर्वल्लवीजनैः
    सममुपागतो यामुने तटे।
मृदुकुचाम्बरैः कल्पितासने
    घुसृणभासुरे पर्यशोभथाः॥ ६॥

कतिविधा कृपा केऽपि सर्वतो
    धृतदयोदयाः केचिदाश्रिते।
कतिचिदीदृशा मादृशेष्वपी-
    त्यभिहितो भवान् वल्लवीजनैः॥ ७॥

अयि कुमारिका नैव शङ्क्यतां
    कठिनता मयि प्रेमकातरे।
मयि तु चेतसो वोऽनुवृत्तये
    कृतमिदं मयेत्यूचिवान् भवान्॥ ८॥

अयि निशम्यतां जीववल्लभाः
    प्रियतमो जनो नेदृशो मम।
तदिह रम्यतां रम्ययामिनी-
    ष्वनुपरोधमित्यालपो विभो॥ ९॥

इति गिराधिकं मोदमेदुरै-
    र्व्रजवधूजनैः साकमारमन्।
कलितकौतुको रासखेलने
    गुरुपुरीपते पाहि मां गदात्॥ १०॥

**********



www.prapatti.com